NAME OF THE TEACHER: **MOUMITA SARKAR**

TOPIC: **FABLES LITERATURE (SUB:SANA,PAPER-CC3,SEC-C)**

1. प्राचीनतमः कथाग्रन्थः कः? तस्य रचयिता कः आसीत्?

Ψ प्राचीनतमः कथाग्रन्थः पञ्चतन्त्रम् इति। तस्य रचयिता आसीत् पण्डितविष्णुशर्मा।

2. पञ्चतन्त्रे कति तन्त्रानि सन्ति?तेषां नामानि उल्लिख्यताम्?

Ψ पञ्चतन्त्रे पञ्च तन्त्रानि सन्ति।तद् यथा-मित्रभेदः,मित्रप्राप्तिः,काकोलूकीयम्, लब्धप्रणाशः अपरीक्षितकारकञ्च इति।

3. पञ्चतन्त्रं कथं रचितम्?

Ψ दाक्षिणात्यप्रदेशस्य महिलारोप्यनगरस्य राज्ञः अमरयशक्तेः जडबुद्धिसम्पन्नेभ्यः पुत्रेभ्यः नीतिशिक्षादानार्थं विष्णुशर्मना पञ्चतन्त्रं रचितम्।

4. पञ्चतन्त्रे कस्य नगरस्य नामोल्लेखः अस्ति?

Ψ पञ्चतन्त्रे महिलारोप्यनगरस्य नामोल्लेखः अस्ति।

5. वेतालपञ्चविंशतिः ग्रन्थे राजा कः आसीत्? अस्मिन् ग्रन्थे कः राज्ञे फलानि प्रदत्तवान्?

Ψ वेतालपञ्चविंशतिः ग्रन्थे विक्रमादित्यः राजा आसीत्। अस्मिन् ग्रन्थे कश्चन सन्न्यासी प्रतिदिनं राज्ञे फलानि प्रदत्तवान्।

6. पदावलीसाहित्यस्य रूपकारः कः आसीत्?तेन विरचितं ग्रन्थं किम्?

Ψ पदावलीसाहित्यस्य रूपकारः विद्यापतिः। स पुरूषपरीक्षा इति ग्रन्थं रचितवान्।

7. विद्यापतेः नामान्तरं किमासीत्?

Ψ विद्यापतेः मैथिलकोकिलः अभिनवजयदेवः इति नामान्तरद्वयं प्राप्यते।

8. पुरूषपरीक्षा केन किमर्थं च रचिता?

Ψ विद्यापतिना शिशूभ्यः नीतिशिक्षादानार्थं पुराङ्गनानां चित्तविनोदनार्थं च पुरूषपरीक्षा इति ग्रन्थं रचितम्।

9. विद्यापतिः कस्य राज्ञः सभाकविः आसीत्? तेन विरचिते ग्रन्थे कति आख्यानानि सन्ति?

Ψ विद्यापतिः मिथिलाधिपतेः शिवसिंहस्य सभाकविः आसीत्। तेन विरचिते ग्रन्थे द्विपञ्चाशत्(मतान्तरेण चतुश्चत्वारिंशत्) आख्यानानि सन्ति।

10.हितोपदेशस्य रचयिता कः अस्ति ?सः कस्य राज्ञः सभाकविः आसीत्?

Ψ हितोपदेशस्य रचयिता पण्डितनारायणशर्मा। सः राज्ञः धवलचन्द्रस्य सभाकविः आसीत्।

11.हितोपदेशे कति लघुकथाः वर्तन्ते? तेषु कति पञ्चतन्त्रात् गृहीताः?

Ψ हितोपदेशे त्रयश्चत्वारिंशत् लघुकथाः वर्तन्ते। तेषु पञ्चविंशतिः लघुकथाः पञ्चतन्त्रात् गृहीताः।

12.वेतालपञ्चविंशतिग्रन्थे कः कं लघुकथां श्रावयति स्म?

Ψ वेतालपञ्चविंशतिग्रन्थे कश्चन शवः राजानं लघुकथां श्रावयति स्म।

13.विक्रमादित्यस्य सिंहासनं केन उद्धारितम्?

Ψ विक्रमादित्यस्य सिंहासनं धाराधिपतिना भोजेन उद्धारितम्।

14.सिंहासनद्वात्रिंशिका इति ग्रन्थस्य नामान्तरं किमासीत्?

Ψ सिंहासनद्वात्रिंशिका इति ग्रन्थस्य नामान्तरं विक्रमार्कचरितं द्वात्रिंशद्पुत्तलिका च इति।

15.सिंहासनद्वात्रिंशिकानुसारेण विक्रमादित्यस्य सिंहासनं केन प्रदत्तम्?

Ψ सिंहासनद्वात्रिंशिकानुसारेण विक्रमादित्यस्य सिंहासनं देवराजेन इन्द्रेन प्रदत्तम्।

16. हितोपदेशः केन किमर्थं च रचितः?

Ψ राज्ञः सुदर्शनस्य पुत्रेभ्यः नीतिशिक्षादानार्थं नारायणशर्मना हितोपदेशः रचितः।

17.भट्टारकवारपदस्य उल्लेखः कस्मिन् ग्रन्थे प्राप्यते?

Ψ भट्टारकवारपदस्य उल्लेखः हितोपदेशे प्राप्यते।

18.शुकसप्ततिग्रन्थस्य ग्रन्थकारः कः आसीत्?

Ψ शुकसप्ततिग्रन्थस्य ग्रन्थकारः आसीत् चिन्तामणिभट्टः।

19.बृहत्कथा कस्यां भाषायां रचिता?

Ψ बृहत्कथा पैशाचीप्राकृतभाषायां रचिता।

20.किमाश्रित्य कः आरव्ययामिनीं रचितवान्?

Ψ शुकसप्ततिम् आश्रित्य जगबन्धुः आरव्ययामिनीं रचितवान्।